# Bhaktivivardhana Stava

# ભક્તિવિવર્ધનસ્તવઃ

## Document Information

Text title : Bhaktivivardhana Stava

File name : bhaktivivardhanastavaH.itx

Category : shiva, stava

Location : doc_shiva

Author : Krishnananda Saraswati

Proofread by : Rajesh Thyagarajan

Description/comments : Minor works of Shri Krishnananda Saraswati

Latest update : November 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 6, 2025

*sanskritdocuments.org*

# ભક્તિવિવર્ધનસ્તવઃ

સકૃદાનતિરચના ચ ભૂયાદુભયોરિત્યનુકમ્પયાલસાનામ્ ।
અવલમ્બિતવિગ્રહૈકભાવં શિવયોઃ શ્રીસમવાયમાશ્રયામઃ ॥ ૧॥

અલિકામ્બકદક્ષિણાશ્રયાશે જગતીમેવ જુહૂષતા સમયેન ।
મદનઃ પ્રથમાહુતિર્વિ(?)તેને તમુપાસે યમિનામુપાસનીયમ્ ॥ ૨॥

તરુણેન્દુકલાકલાપિનં સમયોન્મીલિતમલ્લિકારુચિમ્ ।
સ્મિતચારુકરાનનામ્બુજં શિવયાશ્લિષ્ટતનું શિવં ભજે ॥ ૩॥

અતસૂકૃતકામકારુણી સુતનૂભાવિતવામવિગ્રહમ્ ।
શરણાં કરવાણિ શઙ્કરં કિમપિ જ્યોતિરહં શિવઙ્કરમ્ ॥ ૪॥

કુસુમાયુધકોપિતોઽપિ યોઽલં દયયા તસ્ય તનું દદૌ પ્રિયાયૈ ।
અખિલાર્તિહરં હરં વિના તં કતમં દેવમિહાભિરાધ્નુયામઃ ॥ ૫॥

મદનં દહતાપિ કાન્તયા કવલીકારયતા કલેબરમ્ ।
અનુરાગિ જગદ્વિરાગિ વા ભવતા શઙ્કર વિપ્રલભ્યતે ॥ ૬॥

અવિષહ્યતમેન તામ્યતાં ભવરોગેણ પરં ભિષજ્યતામ્ ।
શિવતાતિમસી વયં વિભો શૃણુમસ્ત્વા ભિષજાં ભિષક્તમમ્ ॥ ૭॥

ક્વચિદેકપદે રસજ્ઞયા પરિકૃષ્યે પરતોઽપિ ચક્ષુષા ।
ક્વચન શ્રવસા બલીયસા તવ શમ્ભો કિમુદાસિતું ક્ષમમ્ ॥ ૮॥

અવરોદ્ધુમિદં ન શક્નુમો વિષયાશીવિષસઙ્ગિ માનસમ્ ।
અપિ રોદ્ધુમુદગ્રચાપલં બત શમ્ભો કરવામ કિં કથમ્ ॥ ૯॥

કૃપણા બહવોઽનુકમ્પિતાઃ કિલ શમ્ભો શતશોઽપિ માદૃશાઃ ।
ન ચ મામતિદીનમીક્ષસે કતમે તે કરુણાપદં જનાઃ ॥ ૧૦॥

અપરાધશતેઽપિ ચાર્થનામપરામાઃ કતમામયઞ્જનઃ
કૃપણો ગિરિશાવલમ્બતાં કૃપયૈવાનુગૃહાણ કેવલમ્ ॥ ૧૧॥

કૃપણં કૃપયાવલોકસે વિલપન્તં યદિ નાથ નાતુરમ્ ।
ક્વનુ યામિ વદામિ કિન્નુવા વિધિપાકેન વિભો નિરાકૃતઃ ॥ ૧૨॥

નનુ દીનદયાવશંવદો ગિરિશ ત્વં પરિગીયસે બુધૈઃ ।
અવલોકય લોચનાઞ્ચલૈરગતિં મામનુકમ્પયાખિલૈઃ ॥ ૧૩॥

સમયં પ્રતિપાલયન્તિ તે શમયન્તો મલમાત્મનોઽમરાઃ ।
ભગવન્ કૃમિકઃ કિયાનહં ન દયા તે યદિ દીનવત્સલા ॥ ૧૪॥

ભવતેઽખિલલોકબન્ધવે ભગવન્ન સ્પૃહયેત કો નુ વા ।
નિપુણં પરિમૃશ્ય નિર્ગતિં કૃપણં માં કૃપયાઽવલોકય ॥ ૧૫॥

અનુ ... વિતિ સંવિભાવ્યતે ન મયૈકેન ભવાનુમાપતે ।
શમયઞ્જગતીતમોતતિં સવિતા ન હ્યનુ કિઞ્ચિદશ્નતિ ॥ ૧૬॥

ઉદિતારુણકોટિરોચિષં ન હિ પશ્યામિ ભવન્તમીશ કિમ્ ।
અથવા કથમન્ધલોચનો જગતીચક્ષુરુદીતમીક્ષતામ્ ॥ ૧૭॥

અધુનાપિ વિચીયતે પદં તવ શમ્ભો શિવ સમ્પદાં પદમ્ ।
વિબુધૈરપિ વેદમૌલિષુ સ્મરતાદસ્ય કથન્નુ માદૃશઃ ॥ ૧૮॥

પ્રયતે પરિણાહિચેતસા પદવીમેષ દવીયસીમપિ ।
અધિગન્તુમયુગ્મનેત્ર તે વિષમં પશ્ય વિમોહયન્ત્રણમ્ ॥ ૧૯॥

મમ ધાવયતિ સ્મરો મતિં મૃગયાવીવ મૃગીમનુદ્રવન્ ।
પરિચારચિતાસ્મિ તે કદા પદયોરીશ્વર તામનાગસમ્ ॥ ૨૦॥

મતિમીશ મમ ત્વદાશ્રયાં સ્મરતેચાપકૃતં સ્મરેણ તે ।
અસતીમિવ વિપ્રલુમ્પનાત્ ત્વદલીકાક્ષિ પુનશ્ચ તૃપ્યતુ ॥ ૨૧॥

રતિરાશ્રયતે ભવત્પદં મતિરન્વેતિ મનો મમાપિ તામ્ ।
અપુનઃશ્વથસઙ્ગમં તયા લભતામીશ ભવાનિવોમયા ॥ ૨૨॥

તવ પાદનખેન્દુમણ્ડલીમવતંસીયતિ મય્યુમાપતે ।
સકલાય દયા વિસૃત્વરી શિવભાવાય સુરાપગાયતામ્ ॥ ૨૩॥

ન વિધાતરવૈમિ તે વિધાં વરિવસ્યાનુવિધૌ જડાશયઃ ।
દયયૈવ તથાપિ પાહિ મામુદવાહા ઇવ શુષ્યદોષધિમ્ ॥ ૨૪॥

દયસે ભજતઃ સ્વતો વિભો કિમુ દૈન્યેન મમાભિચોદિતઃ ।
નવચન્દનમેવ શીતલં નનુ કીદૃગ્ઘનસારલોલિતમ્ ॥ ૨૫॥

અનધીતભવત્પદામ્બુજાન્ અનવેતત્વદુપાસનાવિધીન્ ।
યદિ રક્ષસિ નામ રક્ષિતા શિવ કે કર્મકરં ન વિભ્રતિ ॥ ૨૬॥

અભિષિઞ્ચ દયારસૈર્વિભો ભવદાહજ્વલનો ન માં દહેત્ ।
અમૃતૈરપિ કિં પ્રસેચિતે ભસિતીભૂતરસાલપોતકૈઃ ॥ ૨૭॥

યદિ નામ તવાનુપાસિતા દયનીયો ન ભવામિ નાથ તે ।
અનપેક્ષિતસેવમમ્બુદં જગદુજ્જીવનમેષ કિં બ્રુવે ॥ ૨૮॥

વિભવત્યુચિતં દશાનનો વરિવસ્યઞ્જગતામધીશ્વરમ્ ।
ઉદકૃન્તદયં શિરો નિજં કરુણોઽપીશ પરં તદૈક્ષથાઃ ॥ ૨૯॥

મિષિતેઽપિ નહિ પ્રભૂયતે જગતા યેન શિવ ત્વયા વિના ।
સનિસર્ગસુહૃચ્ચમાત્મના સદૃશં તે મમ યત્પ્રસીદતિ ॥ ૩૦॥

શિવ સત્પ્રવણાપ્યતન્ન મામનુકમ્પા તવ હાતુમર્હતિ ।
નહિ નન્દિતચન્દ્રશાલયા વિપિનં ચન્દ્રિકા વિહીયતે ॥ ૩૧॥

સુકૃતસ્વકૃતેન કર્મણા ભગવન્નિર્વૃણુતેઽપુનર્ભવાઃ ।
અનુગૃહ્ય સુદીનમાશુ મામનુકમ્પા સફલાયતાં તવ ॥ ૩૨॥

યદિ નામ યથાપુરં વિભો પરિખિદ્યેય ભવામ્બુસમ્પ્લવે ।
પ્રકૃતિ કરુણામૃદીયસીમનુતપ્સ્યસિ તવૈવ દુઃસ્થિતિમ્ ॥ ૩૩॥

વ્યસનાત્મકમીશ માસ્મહન્ વ્યસનં માં વિષમેવ વા વિષમ્ ।
કરુણં બત વર્તયિષ્યતે કરુણા દીનપરાઙ્મુખસ્ય તે ॥ ૩૪॥

વિધિદુર્લલિતૈરયે વિભો વિવિધાધિગ્રહનિર્ગૃહીતધીઃ ।
વિવશોઽહમુવાચ દુર્વચં યદુપાલમ્ભમદઃ ક્ષમસ્વ મે ॥ ૩૫॥

કમુપાલભતામયઞ્જનઃ કરુણાત્મન્નસુખાવસાદિતઃ ।
અયિ દીનજનાનુસારિણી કરુણા મૃદ્વિતમા તવૈવ ચેત ॥ ૩૬॥

ન ભવન્તમુપલભે વિભો મમ દૈન્યન્તુ નિવેદયામિ તે ।
પરિપાકકટૂ રુજા નિજા ન નિવેદ્યા ભિષજે કિમાતુરૈઃ ॥ ૩૭॥

શરણાગતવત્સલોઽસિ કિં શમિતાશેષશિવેતરોઽસિ કિમ્ ।
અનુનાથ કથા કદર્થના ન વિષહ્યેત કથં ત્વયા વિભો ॥ ૩૮॥

અયિ નાથ ભવાનુપેક્ષતે ભજમાનં નિજતન્ત્રવેષ્ટિતઃ ।

મમ ચ ત્વયિ રૂઢસઙ્ગતં હૃદયં સીદતિ હા કરોમિ કિમ્ ॥ ૩૯ ॥

અયિ નાથ ભવાનીશ્વરો જગતીપૂજનયા જડીકૃતઃ ।
શરણં કમુપૈમ્યહં પુનસ્ત્વદૃતે હન્ત જગન્નિરીશ્વરમ્ ॥ ૪૦ ॥

અભિયામિ યદન્યમીશ્વરં વિજહત્ત્વા જગતીપરાયણમ્ ।
કનકં પરિહૃત્ય બાલિશઃ કટકીયામિ વિભો ન કિન્તમામ્ ॥ ૪૧ ॥

વ્યસનૈરુપતાપિના મયા ન ચિરં ક્રીડિતુમીશ તે ક્ષમમ્ ।
પરિખેલતિ હન્ત જમ્બુકો વ્યથતે કિન્તુ કુલીરજીવિતમ્ ॥ ૪૨ ॥

અસુખાનિ ચિરં ચિકીર્ષતા વિધિના મે વિપરીતવર્તિના ।
કરુણારસકોમલં વિભો હૃદયં કિં તવ કર્કશીકૃતમ્ ॥ ૪૩ ॥

યદનન્યગતીનુપેક્ષસે વિષમાક્ષાખિલકામદોઽપિ સન્ ।
પરિતાપજુષોઽપિ માદૃશઃ તદભવ્યં તવ દુશ્શ્રવં મમ ॥ ૪૪ ॥

અવિતુર્જ્જગતામયં જનઃ કિમિતીશાન ભરાયતે તવ ।
અપચાતકમમ્બુદાવલિર્નહિ તાપોપશમાય વર્ષતિ ॥ ૪૫ ॥

સમયન્ સ્વયમૈન્દવીં કલામપિ કઙ્કાલમલઙ્ક્રિયાવિધૌ ।
અશુચિં પરિહર્તુમીહતે કથમીશાન ભવાનિમં જનમ્ ॥ ૪૬ ॥

અવતંસયસી નિમ્નગામપિ હાલાહલતાપશાન્તયે ।
અતિહાલહલાધિશાન્તયે મમ ચાપીડય પાદ્યમમ્બુ તે ॥ ૪૭ ॥

અભિવન્દિતુમૈન્દવીં કલામહમી હેભવતાવતંસિતામ્ ।
અયિ નાથ ભવાર્કતાપિતં હૃદયં શીતલયિષ્યતે તયા ॥ ૪૮ ॥

દશમી ભગવદ્દશા પુરા કિલ મામાવિરુદેતિ દુઃસહા ।
અધુનૈવ મમાવલમ્બતામભયં તે હૃદયં પદામ્બુજમ્ ॥ ૪૯ ॥

અમૃતસ્રુતિ પાદપઙ્કજે તવ શમ્ભો ન પરં સ્વદે તતઃ ।
સ્વદતે ન હિ કાશકોરકો મકરન્દસ્રુતિ પઙ્કજેઽલિને ॥ ૫૦ ॥

અપિ દુર્લભમીશ માનસં ન ભવન્તં મમ હાતુમીહતે ।
ન હિ કામપરો મનોહરે મનુતે લાભમલાભમેવ વા ॥ ૫૧ ॥

ભગવન્ભવગોચરેઽપિ મે ધિષણા ત્વત્પદપદ્મકામ્યતિ ॥

અસિતાસુ તમીષુ લિપ્સતે ન ચકોરી કિમુ ચારુકૌમુદીમ્ ॥ ૫૨ ॥

સકૃદપ્યવભાહિ માનસે મમાચ વ્યેતુ ભવાધિસમ્પ્લવઃ ॥
મિહિરે હિ નભસ્યુદિત્વરે તિમિરં સત્વરમેવ શામ્યતિઃ ॥ ૫૩॥

ભગવન્નવધીરિતસ્ત્વયા પરિગૃહ્યેય પરેણ કેન વા ।
ન હિ માતુરસમ્મતો જનો ભજતિ ગ્રામજનસ્ય સમ્મતિમ્ ॥ ૫૪॥

નનુ ભૂસલિલાનલાનિલદ્યુશશાઙ્કારુણસોમપાકૃતિમ્ ।
ભુવનં પરિભાસિ ભૂતયે જગતામેવ ભવદ્વિભૂતયઃ ॥ ૫૫॥

ત્વદધીનમિદં યદસ્તિ મે તવ ચાહં પરમેશ યોઽસ્મ્યહમ્ ।
શરમેવમુમાપતે મમ પ્રણતં માં પરિપાલય પ્રભો ॥ ૫૬॥

જનની જનકસ્ત્વમેવ મેં ગુરુરારાધ્યતમશ્ચ દૈવતમ્ ।
શરણં પરમં પરા ગતિઃ શિવઃ સર્વસ્વમપિ ત્વમેવ મે ॥ ૫૭॥

અહિમાંશુકલાવતંસકૈઃ અનલીકાઞ્ચિત દિવ્યલોચનૈઃ ।
અમરૈરવરૈરુપાસિતૈરનુમાજીવિતવલ્લભૈરલમ્ ॥ ૫૮॥

યદિ તે પદપઙ્કજં નમન્ યદિ વા નામ સદામ વાલપન્ ।
યદિ મઙ્ગલવિગ્રહં સ્મરન્ ભવ ભૂયાસમહં ભવે ભવે ॥ ૫૯॥

વિહિતાઞ્જલિસમ્પુટેન મૂર્ધ્ના વિગલદ્બાષ્પકલા કુલેન ચાક્ષ્ણા ।
વપુષા પુલકાઞ્ચિતેન શમ્ભો ભજતસ્ત્વામભિપદ્યતાં મમાયુઃ ॥ ૬૦॥

ઇતિ ભક્તિવિવર્ધનસ્તવં યઃ પઠતિ શ્રીશિવસન્નિધૌ યતાત્મા ।
દુરિતાનિ વિધૂય દૂરતોઽસૌ સકલં મઙ્ગલમશ્નુતે સદૈવ ॥ ૬૧॥

શ્રીરામભદ્રયોગીન્દ્રચરણામ્બુજરેણુના ।
કૃષ્ણાનન્દેન રચિતઃ સ્તવો ભક્તિવિવર્ધનઃ ॥

કૃષ્ણાનન્દકૃતિષુ ભક્તિવિવર્ધનસ્તવઃ સમ્પૂર્ણઃ ॥

Proofread by Rajesh Thyagarajan

*Bhaktivivardhana Stava*

pdf was typeset on November 6, 2025

Please send corrections to *sanskrit@cheerful.com*